श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ निर्यातनापद्धतिः अष्टमी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ निर्यातनापद्धतिः अष्टमी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अभिषेकोत्सवात्तस्मात् यस्या निर्यातनोत्सवः।
अत्यरिच्यत तां वन्दे भव्यां भरतदेवताम्॥ **8.1** ॥

उपास्य वर्षाणि चतुर्दश त्वाम्
उत्तारिकामुत्तरकोसलस्थाः।
सनन्दनाद्यैरपि दुर्विगाहं
सान्तानिकं लोकमवापुरग्र्यम्॥ **8.2** ॥

पादावनि ! प्रत्ययितो हनूमान्
सीतामिव त्वां चिरविप्रयुक्ताम्।
प्रणम्य पौलस्त्यरिपोरुदन्तं
विज्ञापयामास विनीतवेषः॥ **8.3** ॥

तवाभिषेकान्मणिपादरक्षे !
मूले निषेकादिव वृद्धियोग्यात्।
जहुस्तदैव त्रिदशाङ्गनानां
प्रम्लानतां पत्रलताङ्कुराणि॥ **8.4** ॥

सर्वतस्त्वदभिषेकवासरे
सम्यगुद्धृतसमस्तकण्टके।

राघवस्य विपिनेषु पादुके !
    यत्र कामगमता व्यवस्थिता ॥ **8.5** ॥

किं चतुर्दशभिरेव वत्सरैः
    नित्यमेव मणिपादुके युवाम् ।
पादयोस्त्रिभुवनाधिराजयोः
    यौवराज्यमधिगच्छतं स्वयम् ॥ **8.6** ॥

रामस्य राक्षसवधत्वरितस्य काले
    पादावनि ! प्रकटयन्निव पार्ष्णिगुप्तिम् ।
आचित्रकूटमधिगम्य शशंस वार्ताम्
    अव्याहतत्वदभिषेकमृदङ्गनादः ॥ **8.7** ॥

भद्राणि देवि ! जगतां प्रतिपादयिष्यन्
    प्रागेव येन भवतीं भरतोऽभ्यषिञ्चत् ।
मन्ये कपीश्वरविभीषणयोर्यथावत्
    सन्तन्यते स्म तत एव किलाभिषेकः ॥ **8.8** ॥

सम्भिद्यमानतमसासरयूपनीतैः
    संवर्धितस्तव शुभैरभिषेकतोयैः ।
मन्ये बभूव जलधिर्मणिपादरक्षे !
    रामास्त्रपावकशिखाभिरशोषणीयः ॥ **8.9** ॥

पादावनि ! त्वदभिषेचनमङ्गलार्थं
    भेरीशतं भृशमताड्यत यत्प्रतीतैः ।
आकर्ण्य तस्य सहसा तुमुलं निनादं
    लङ्काकवाटनयनानि निमीलितानि ॥ **8.10** ॥

तापोद्गमस्त्वदभिषेकजलप्रवाहैः
    उत्सारितस्त्वरितमुत्तरकोसलेभ्यः ।

लेभे चिराय रघुपुङ्गवपादरक्षे !
लङ्कावरोधसुदृशां हृदयेषु वासम् ॥ **8.11** ॥

आवर्जितं विधिविदा मणिपादरक्षे !
पद्मासनप्रियसुतेन पुरोहितेन।
आसीन्निदानमभिषेकजलं त्वदीयं
नक्तञ्चरप्रणयिनीनयनोदकानाम् ॥ **8.12** ॥

देवि ! त्वया स्नपनसम्पदि संश्रितायां
दग्धे पुरे दशमुखस्य वलीमुखेन।
आसीत्ततः प्रभृति विश्वजनप्रतीतम्
अद्भ्योऽग्निरित्यवितथं वचनं मुनीनाम् ॥ **8.13** ॥

आयोध्यकैस्त्वदभिषेकसमिद्धहर्षैः
आध्मापिताः श्रुतिसुखं ननु ते तदानीम्।
रामस्य राक्षसशिरोलवनेऽप्यशाम्यन्
येषां ध्वनिर्विजयशङ्खरवो बभूव ॥ **8.14** ॥

प्रथयितुमभिषेकं पादुके ! तावकीनं
दुरितशमनदक्षे दुन्दुभौ ताड्यमाने।
सपदि परिगृहीतं साध्वसं देवि ! नूनं
दशवदनवधूनां दक्षिणैर्नेत्रकोशैः ॥ **8.15** ॥

रघुपतिपदरक्षे ! रत्नपीठे यदा त्वाम्
अखिलभुवनमान्यामभ्यषिञ्चद्वसिष्ठः।
दशमुखमहिषीभिर्देवि ! बाष्पायिताभिः
स्तनयुगमभिषेक्तुं तत्क्षणादन्वमंस्थाः ॥ **8.16** ॥

रामास्त्राणि निमित्तमात्रमिह ते लब्धाभिषेका स्वयं
रक्षस्तत्क्षपयाञ्चकार भवती भद्रासनस्थायिनी।

यद्दोष्णामतिवेलदर्पदवथुज्वालोष्मलानां तदा
    निष्पिष्टैः कलधौतशैलशिखरैः कर्पूरचूर्णायितम् ॥ **8.17** ॥

श्रुत्वैवं हनुमन्मुखाद्रघुपतेः प्रत्यागतिं तत्क्षणात्
    आसीदद्भुरतानुवर्तनवशादारूढकुम्भस्थलाम्।
कालोन्निद्रकदुष्णदानमदिरामाद्यद्द्विरेफध्वनि -
    श्लाघाचाटुभिरस्तुतेव भवतीं शत्रुञ्जयः कुञ्जरः ॥ **8.18** ॥

प्रत्यागतस्य भवतीमवलोक्य भर्तुः
    पादारविन्दसविधे भरतोपनीताम्।
पूर्वाभिषेकविभवाभ्युचितां सपर्यां
    मध्ये सतामकृत मैथिलराजकन्या ॥ **8.19** ॥

सम्प्रेक्ष्य मैथिलसुता मणिपादरक्षे !
    प्रत्युद्गतस्य भवतीं भरतस्य मौलौ।
निर्दिश्य सा निभृतमञ्जलिना पुरस्तात्
    तारादिकाः प्रियसखीरशिषत्प्रणन्तुम् ॥ **8.20** ॥

तुल्येऽपि देवि ! रघुवीरपदाश्रयत्वे
    पूर्वाभिषेकमधिगम्य गरीयसी त्वम्।
तेनैव खल्वभजतां मणिपादरक्षे !
    रक्षःप्लवङ्गमपती भवतीं स्वमूर्ध्ना ॥ **8.21** ॥

निर्वृत्तराक्षसचमूमृगयाविहारो
    रङ्गेश्वरः स खलु राघववंशगोप्ता।
वंशक्रमादुपनतं पदमाददानो
    मान्यं पुनस्त्वयि पदं निदधे स्वकीयम् ॥ **8.22** ॥

तत्तादृशोश्चरणयोः प्रणिपत्य भर्तुः
    पौरास्त्वया विधृतयोः प्रतिपन्नसत्त्वाः।

प्राप्ताभिषेकविभवामपि पादुके ! त्वाम्
आनन्दबाष्पसलिलैः पुनरभ्यषिञ्चन् ॥ **8.23** ॥

मातस्त्वयैव समये विषमेऽपि सम्यक्
राजन्वतीं वसुमतीमवलोक्य रामः।
सञ्जीवनाय भरतस्य समग्रभक्तेः
सत्यप्रतिश्रवतयैव चकार राज्यम् ॥ **8.24** ॥

पादावनि ! प्रतिगतस्य पुरीमयोध्यां
पौलस्त्यहन्तुरभिषेकजलार्द्रमूर्तेः।
अंसे यथार्हमधिवास्य निजैर्यशोभिः
कस्तूरिकेव निहिता वसुधा त्वयैव ॥ **8.25** ॥

याऽसौ चतुर्दश समाः पतिविप्रयुक्ता
विश्वम्भरा भगवती विधृता भवत्या।
विन्यस्य तां रघुपतेर्भुजशैलशृङ्गे
भूयोऽपि तेन सहितां भवती बभार ॥ **8.26** ॥

निस्तीर्णदुःखजलधेरनघस्य देवि !
त्वत्सम्प्रयुक्तरघुनाथपदान्वयेन।
सद्यः सनन्दनमुखैरपि दुर्निरीक्षा
साम्राज्यसम्पदपरा भरतस्य जज्ञे ॥ **8.27** ॥

निर्गत्य देवि ! भरताञ्जलिपद्ममध्यात्
भूयः समागतवती पुरुषोत्तमेन।
पद्मेव भद्रमखिलं मणिपादरक्षे
प्रादुश्चकार भवती जगतां त्रयाणाम् ॥ **8.28** ॥

रघुपतिमधिरोप्य स्वोचिते रत्नपीठे
प्रगुणमभजथास्त्वं पादुके ! पादपीठम्।

तदपि बहुमतिस्ते तादृशी नित्यमासीत्
क्व नु खलु महितानां कल्प्यते तारतम्यम् ॥ **8.29** ॥

अनुवृत्तरामभावः शङ्के निर्विष्टचक्रवर्तिपदाम् ।
अधुनाऽपि रङ्गनाथः सचमत्कारं पदेन भजति त्वाम् ॥ **8.30** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे निर्यातनापद्धतिः अष्टमी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥